श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री यदुगिरिनायिका सुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री यदुगिरिनायिका सुप्रभातम् ॥

श्रीयादवक्षितिभृदीशविशालवक्षः
    सौधान्तरोज्ज्वलमनोहरदिव्यमूर्ते।
क्षीराम्बुधिप्रियसुते ! प्रणतेष्टदात्रि !
    यद्वद्रिनाथदयिते ! तव सुप्रभातम् ॥ 1 ॥

कल्याणतीर्थमवगाह्य सुतीर्थपूर्ण -
    सौवर्णभद्रकलशान् शिरसा वहन्तः।
तिष्ठन्ति वैदिकशिखामणयः प्रहृष्टा
    यद्वद्रिनाथदयिते ! तव सुप्रभातम् ॥ 2 ॥

एतेऽपि नारदमुखास्सुरवैणिकाश्च
    त्वत्पादपङ्कजविलीननिजान्तरङ्गाः।
गायन्ति ते गुणगणान्निगमान्तगम्यान्
    यद्वद्रिनाथदयिते ! तव सुप्रभातम् ॥ 3 ॥

इन्द्रानलान्तकमुखाश्च दिशामधीशाः
    सम्प्रापितोन्नतपदास्त्वदपाङ्गलेशैः।
त्वां संस्तुवन्ति विहिताञ्जलयः प्रकामं
    यद्वद्रिनाथदयिते ! तव सुप्रभातम् ॥ 4 ॥

देवि ! त्वया सुचरितस्य सुते प्रसादा -
    द्यादृग्विधाः प्रकटिताः करुणातरङ्गाः।
तादृग्विधानिह तरङ्गय मय्यपाङ्गान्
    यद्वद्रिनाथदयिते ! तव सुप्रभातम् ॥ 5 ॥

यैरुन्नतिं समगमन्न च शङ्कराद्याः
    यानीहते हरिरपि त्रिजगद्विधाने।
मातस्त्वमद्य समुदञ्चय तानपाङ्गान्
    यद्वद्रिनाथदयिते ! तव सुप्रभातम् ॥ **6** ॥

सद्यः प्रफुल्लकरपद्मगळन्मधूल -
    पानोन्मुखा मधुकरास्तव सुप्रभातम्।
शंसन्ति झङ्कृतिमिषेण किलाद्य देवि !
    यद्वद्रिनाथदयिते ! तव सुप्रभातम् ॥ **7** ॥

कर्णावतंसितसरोजयुगे प्रफुल्ले
    सद्यस्समुन्मिषदपाङ्गपरम्परास्ते।
निष्पन्दपुष्टरसपानरताळिमाला -
    लीलां वहन्ति कमले तव सुप्रभातम् ॥ **8** ॥

दारिद्र्यदावदहनान्तरतप्यमान -
    खेदापनोदनधुरीणकटाक्षपूरे !।
उत्फुल्लपङ्कजदळायतलोचनान्ते
    यद्वद्रिनाथदयिते ! तव सुप्रभातम् ॥ **9** ॥

जयतु जयतु देवी देवसङ्घादिपूज्या
    जयतु जयतु पद्मा पद्मसद्माऽभिवन्द्या।
जयतु जयतु नित्या निर्मलज्ञानवेद्या
    जयतु जयतु सत्या सर्वभूतान्तरस्था ॥ **10** ॥

सुप्रभातमिदमप्रमत्तधीः
    यः प्रभातसमये पठेन्नरः।
क्षिप्रमेति सकलानभीप्सितान्
    दीर्घमायुरथ शाश्वतं पदम् ॥ **11** ॥

स्वामी सुशीलस्सुलभस्सर्वज्ञस्सर्वशक्तिधृत्।
वत्सलो यत्सहायस्तां वन्दे यदुगिरीश्वरीम्॥ **12**॥

॥ इति श्री यदुगिरिनायिका सुप्रभातं समाप्तम्॥